ad brumam vergente. Segregavi tamen ex foeda illa colluvie fragmentum Ramayani, (fol. 228 — 303.) recollegi quoque paene integrum codicem carminis de Crishni ἐπιφανείᾳ, (*Srí-Bhágavata-Purán'a*) et folia, quotquot reperire poteram, ordine suo reposui. Non me fefellerat scriptura vetustatis speciem prae se ferens: haud mediocriter miratus, legi ad calcem librorum annotatos annos SAMVAT 1461 — 1463, i. e. A. Chr. 1405 — 7. Antiquissimus inter omnes Regios Parisienses est codex eiusdem carminis (cf. Catal. Hamilt. p. 9, N. I.) scriptus sexaginta quinque annis post, SAMVAT 1528, A. Chr. 1472. Possidet ergo Academia Oxoniensis, adhuc divitiarum suarum ignara, exemplar unicum et rarissimum in litteris Sanscritis.

Postea comperi, codicem hunc Ratcliffianum antiquitate non aequari solum, sed longe superari uno ex libris Toddianis, cui titulus est *Gan'a-Ratna-Mahódadhi,* (videtur esse tractatus arithmeticus) adscripta anni nota SAMVAT 1151, i. e. A. Chr. 1097. Plerique, quos in bibliothecis Europaeis noverim, sunt admodum recentes: pauci ad duo secula, paucissimi ad tria ascendunt. At frustra patroci-

nium inde quaerunt opinioni suae critici illi mediastini, ad dubitandum sine ratione obstinati, qui detrudendo ad tempus novissimum omnia disciplinarum artiumque apud Indos monumenta, quasi gens olim cultissima humanitatis prima elementa χθὲς καὶ πρώην accepisset, mirum quantum sapere sibi videntur; sed nihil ultra efficiunt, nisi ut prodant, ad prisci aevi indolem dignoscendam sensum ipsis plane occalluisse. Facile intelligitur codices, quibus vetustas summam auctoritatem conciliavit, in bibliothecis principum et collegiorum sacerdotalium asservatos, non vulgo venales prostare: praesertim quum docti inter Indos magni faciant libros minime speciosos, sed lectorum eruditorum manu ab erroribus librariorum purgatos. Adde quod multo fragiliores sunt, pluribusque casibus obnoxii codices chartacei et palmifoliacei, quam membranacei, quales ex antiquitate et medio aevo ad nos pervenerunt. Insidiantur istis praecipue formicae albae, quarum catervae innumerabiles sub torrido Indiae coelo magnos librorum cumulos paucis horis conficere posse dicuntur. Ab earum morsu ut codicibus caveatur, saepe folia colore flavo ex acerrimo

veneno, auripigmento, praeparato illita videmus.

Attamen defectus librorum vetustiorum quodammodo compensatur proventu exemplarium e diversis Indiae regionibus. Nam quae in locis immenso intervallo separatis eodem modo scripta sunt, ea translaticia esse, et e communi fonte intemerata fluxisse, credere par est. Et hac saltem ex parte, quanquam nullus inter codices nostros antiquitate valde insignis sit, satis bene mihi processit: siquidem recensionem Commentatorum e terris Gangeticis ortam in peninsula, Bengalicam in India occidentali fideliter repraesentatam inveni.

Restat ut rationes meas in textu constituendo, et quomodo subsidiis meis usus sim, breviter exponam.

Recensio Commentatorum et Bengalica nec simul ambae recipi poterant, neque commode inter se coalescere: alterutra erat eligenda. Illam praetuli; cur praeferendam censeam, supra obiter indicavi. Sane, si nullam aliam nossemus praeter Bengalicam, utique ei standum fuisset; et sine dubio magni aestimaturi eam fuissemus; nec fortasse suspicaturi, sin-

cerius quicquam ex ultimae antiquitatis penetralibus proferri posse. Non solum nihil novatum in argumenti summa, narrationis ordo religiose servatus: sed sententiae quoque singulis sententiis, versus versibus plerumque respondent; tam fida imagine expressum est exemplar, ut in utraque recensione res easdem, diverso duntaxat modo enuntiatas, bis legere tibi videaris. Longe maxima pars varietatis in dictione consistit. Sed in huius etiam colore veteres illi editores Bengali aemulati sunt priscam carminis epici simplicitatem: raro delapsi ad argutias, ad ornamenta nimis ambitiosa, et structuram verborum, quae grammaticam subtilitatem redoleat. At comparatione acuitur iudicium: singulatim collatis commentatorum lectionibus cum Bengalicis vix dubium fore puto criticis talium rerum sensu imbutis, utrae sint nativae vel posterioribus curis retractatae. Video, grammaticos scholae Bengalicae interdum scabritiem quandam sermonis tollere voluisse, vocabula obsoleta, structuram minus apte cohaerentem, denique licentias epicas, exempli gratia omissum augmentum in praeterito imperfecto,

vel formam य pro त्वा in absolutivis verborum simplicium: quarum licentiarum usus legitimus ex Manûs codice probatur. Perspicuitati quoque prospexerunt, quod adeo verum est, ut haud raro in locis difficilioribus lectiones Bengalicae scholiorum vice ad interpretandum valde utiliter adhiberi possint. Fateor tamen saepe me non assequi, quid mutando lucrari sibi visi sint; et nihil aliud subesse arbitror, praeter novandi libidinem, et importunam grammaticorum semipoetarum sedulitatem.

Quibus omnibus diligenter observatis atque perpensis, editioni meae Commentatorum recensionem pro fundamento substruere decrevi. Ubi variant inter se prior et alter, liberam mihi eligendi facultatem sumpsi; in locis corruptis vel quocunque tandem modo turbatis, tum a Bengalis, tum a codicibus mixti generis auxilium circumspexi. Etenim quae ab his proferuntur, etiamsi a Commentatorum recensione absunt, idcirco non protinus sunt aspernanda, sed suo merito unumquodque aestimandum. Sine dubio Bengali recensionem istam ante oculos habuere: quis vero negare audeat, eos nonnulla ex

aliis veteris memoriae monumentis haurire potuisse?

Haud ambiguis indiciis perspectum habeo, doctos Brachmanos, qui ordinando Valmicis carmini studia sua dicarunt, non tantum de poeticae artis perfectione sollicitos, quantum de doctrina sacra, theologicis magis quam criticis rationibus inductos nonnulla ex iis, quae ante se tradita fuerant, reiecisse, alia recepisse. Multo brevius episodium de Rishyasringa (LIB. I, CAP. IX.) exhibent commentatores quam Bengali, quibuscum in narratione uberiore conspirant codices nostri eclectici. Scilicet metuerunt homines religiosi, ne fabula paulo lascivior parum consentanea esset gravitati argumenti; offendit eos praecipue, quod pater Rishyasringae, vir sanctissimus et vaticinandi dote praeditus, fraudem puellarum non sensisse narrabatur. Omiserunt ergo descriptionem iocorum et illecebrarum, quibus saltatrices anachoretarum habitu indutae adolescentem feminei sexus ignarum irretiunt; omiserunt etiam adventum senis, eiusque colloquium cum filio: quo pacto prorsus ieiuna evasit narratio. Equidem poetam tanta venustate spoliari non

sum passus; transtuli episodium plenissimum ex Bengalica recensione, assumtis quibusdam versibus e Codice Devanagarico Parisiensi et Toddiano.

Ut alio exemplo utar: Bharata ad avum maternum dimisso, multa de eius institutione addunt Bengali, quorum ne vestigium quidem apud commentatores deprehenditur. (Cf. ED. SR. L. I, CAP. LXIII, sl. 36 — 42, CAP. LXIV, sl. 1 — 17.) Nimirum auctor horum versuum proponere voluit exemplar institutionis, qualis adolescentem regium deceat; voluit inculcare ante omnia, debere regum filios a nutu Brachmanorum pendere. Sed praepostera haec sunt, fastidiosa et alieno loco intrusa: multo ante de Bharatae fratrumque eius educatione traditum fuerat; nunc is iam uxorem duxit, et ad alia maioris momenti properat poeta.

Narratur, in sacrificio equino inter multa millia hospitum Brachmanis insignem honorem fuisse habitum. Addunt Bengali, reges famulorum munere functos iis adstitisse, mensisque eorum dapes imposuisse:

राजानोऽभ्यागतास्तत्र स्वयमेव स्वलंकृताः ।
भृत्यवत् प्रणता यज्ञे द्विजान् वै पर्यवेशयन् ॥

Quis, quaeso, hic non agnoscit superbiam sacerdotum, qui honores nimios, ab regibus insolentius efflagitatos, antiquissimo exemplo sancire conati sunt?

Lubrico vestigio insistit V. Cl. HEERENIUS, *prof. Gottingensis*, in libro suo de commerciis veterum populorum, (OPP. HIST. Vol. XII, pag. 129.) dum putat, ex mentione sectatorum Buddhae secundo libro Rameidos iniecta de tempore, quo totum carmen sit conditum, quicquam legitime concludi posse.

यथा हि चोरः स तथा हि बुद्धस्
तथागतं नास्तिकमत्र विद्धि ।
तस्माद्धि यः शक्यतमः प्रजानां
न नास्तिकेनाभिमुखो बुधः स्यात् ॥

(Cf. ED. SR. Vol. III, pag. 452.) Sunt versus spurii; reiecti a Bengalis in sola commentatorum recensione leguntur. Buddhas quidem mille fere annis ante Christum natum vixit: sed post multa demum secula, odio internecivo inter Brachmanos et Buddhae sectatores orto, his denique ex India pulsis, fingi potuit iniquissima criminatio, eos animi immortalitatem, poenasque et praemia in vita futura negare. Praeterea metrum, quo concinnati sunt

hi versus, de quo metro mox disseram, recentiorem aetatem arguit.

In exemplis supra laudatis alterius recensionis auctoritatem alteri opponere poteram: sed quoties ipsa res clamat, versus esse spurios interpolatosque, obelis confodiendos censeo, vel sexcentis codicibus refragantibus. Horum enim consensu id modo probatur, alte insedisse corruptelam et late grassatam esse. Mihi autem ea cura praecipua fuit, ut aut veram carminis faciem, aut digniorem saltem tum antiqua fama, tum poetae virtutibus in universi carminis tenore spectatis instaurarem.

Quod si ante me in textu castigando critici versati fuissent, quales fuerunt Alexandrini, nihil aliud mihi curandum putassem, quam ut vestigiis eorum, emendatis tantummodo librariorum erroribus, quam diligentissime insisterem. At longe aliter res se habet. Sunt sane solertissima Indorum ingenia, quippe quae nimis etiam in tradendis disciplinis subtilitati ambagibusque abstrusis indulgeant: sed obstitit apud eos critico acumini, ut fieri solet, superstitio. Scilicet nefas habuere homines religiosi, tanquam spuria eiicere, quae per

aliquod tempus, nulla fortasse idonea auctoritate, inter sanctissimi vatis effata recepta fuerant, qualiacunque tandem essent. Inde factum, ut corruptelae et interpolationes, sive ex negligentia et inscitia ortae, sive audaci fraude illatae, quum semel irrepsissent, facile locum suum tuerentur, et inveterascendo magis magisque gliscerent. In universum primi editores nec rhapsodorum vetustiorum additamenta satis severe rescidisse, neque in posterum sinceritati textus a simili licentia satis cavisse videntur: quod quidem, sicuti supra monui, vix aliter quam commentario perpetuo fieri poterat. Quicquid sit, nonnulli loci tam impedita confusione, tam cumulatis repetitionibus laborant, narratione interim nusquam progrediente, sed Maeandrio quasi flexu in se redeunte, ut intellexerim non critici solum sed διασκευαστοῦ munere mihi esse fungendum. Facillime evagari potuit addendi libido in descriptionibus stativis et laudibus rerum personarumque, cuiusmodi continentur capitibus primi libri proxime post prooemium positis; et ibi neutra recensio hac labe caret. Narratio per seriem rerum procedens confusioni minus erat obnoxia: inter-

dum tamen ea quoque praepostere in se recurrit. Sic ex. gr. in commentatorum recensione bis de sacrificii equini apparatu deliberatur; altera vice post annum, quo opus erat, iam in eodem consumtum. (Cf. ED. SR. L. I, CAP. VIII, sl. 11. sqq. et CAP. XI, sl. 15 sqq.) Hoc vitium sustulerunt Bengali, quadraginta versibus priore loco eiectis, quorum exemplum imitatus sum.

Ceterum non recessi a commentatorum recensione, nisi necessitate quadam urgente. Disticha integra ea tantum eieci, quae vana repetitio sententiae iam prolatae e lusu variandae dictionis subnata esse demonstrat. Singuli versus saepius fuerunt eiiciendi, sed ne id quidem sine certa lege factum est. De metrica ratione *s'lôci* sive distichi heroici et gnomici disserui in praefatione ad Bhagavad-Gitam. Cuius metri regulam mira cum brevitate, exemplo simul exhibito, complexus est *Câlidâsas* hisce versibus:

॥ अथानुष्टुप्छन्दः ॥

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयादेतत् पद्यस्य लक्षणं ॥

॥ अपरानुष्टुब्यथा ॥

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमं ।

द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥

Forma a metrico descripta est usitatissima: attamen in primi et tertii hemistichii postremis quatuor syllabis maior quaedam licentia concessa est poetis epicis et gnomicis, ut et alii pedes praeter antispastum vel primum epitritum ibi admittantur, excepto semper diiambo vel altero paeone. Quod autem ad sententiarum membra attinet, slocus plane similis est distichi elegiaci, quale poetae Latini seculi Augustei id elaborarunt. Nimirum in elegiis Graecorum sententia plerumque ultra finem distichi continuatur, ita quidem ut sensu postrema pentametri verba cum primis hexametri sequentis arctissime cohaereant; quin et venustatem quandam ex ista clausularum coniunctione cum exordiis quaesiverunt: Latini contra, principio exemplaria Graeca tam in distichorum nexu quam in ceteris imitati, deinde diverso iudicio aurium Romanarum obsequuti, aut singulo disticho integram sententiam incluserunt, aut si quando ampliore verborum ambitu opus esset, curarunt ut eius

incisa cum metri articulis convenirent. Haec eadem est sloci natura: sententiae simul cum distichis incipiunt, iisdem terminantur; complexus rarior duorum distichorum युग्म, plurium कुलक a grammaticis dicitur.

In multis Ramayani et Maha - Bharati capitibus codices imparem versuum numerum exhibent; librarii inaequalitatis celandae gratia slocos ex uno versu, vel e tribus conflatos excogitarunt. Enimvero hoc ipsi definitioni repugnat: diserte in fabula de huius metri inventione (RAM. L. I, CAP. II, sl. 43.) declaratur, sloci esse membra quatuor, syllabarum numero inter se aequalia, quae nos hemistichia nuncupamus; et similis divisio stropharum seu distichorum per membra quaterna in universa re metrica Indorum dominatur. Igitur ubique numerus impar indicio est versum unum aut excidisse, aut intrusum esse. Sed hoc multo saepius accidit quam istud. Inde porro legitimus ordo turbatur, slocorum compage soluta, et sententiis in bina disticha discerptis. Hisce indiciis nunquam fallentibus indagare oportet versum spurium, quo eiecto elegans illa symmetria quasi miraculo sua sponte redintegratur. Ubi nullus

reperiebatur versus suspectus, qui commode a narratione abesse posset, locum vacuum reliqui versui omisso, ut recto talo starent sloci sequentes. Eiusdem vitii plura exempla obvia sunt in episodio de Nalo, de quibus observationes meas cum eius editore FRANCISCO BOPP, professore Berolinensi, communicavi. Docte et religiose, sed fortasse nimis timide versatus is erat in pulcherrimo episodio recensendo: spero me viro clarissimo persuasisse, versum supervacuum, in quo culpa numeri imparis latet, ubique falce critica audacter esse resecandum.

Poenitet me nunc mei consilii, quod non statim ab initio, praeter versus istos accensos, eiecerim cuncta disticha diversis a sloco vulgari metris composita. Metra sunt duo: pariter ambo constant quatuor hemistichiis inter se aequalibus, alterum undenarum syllabarum, alterum duodenarum, hunc in modum:

⏓ — ⏑ — | — ⏑ ⏑ — | ⏑ — ⏓
⏑ — ⏑ — | — ⏑ ⏑ — | ⏑ — ⏑ ⏒

Cuius generis versus in primo et secundo Rameidos libro nusquam nisi ad finem capitum apposita inveniuntur, et huic loco unice sunt accommodata, quasi peroratio, lyricis numeris

assurgens, quo magis canorae cadant clausulae: sicuti musici in concentibus extremis omnium vocum instrumentorumque ictu fortiore aures percellere amant. Igitur disticha illa non ante divisionem per capita illatam addi potuerunt: hanc autem grammaticis deberi argumento est ipse recensionum dissensus, manifesto inde ortus, quod singuli editores in ea constituenda suo quisque iudicio usi sunt; praeterquam quod non credibile est, poetam artis suae peritum narrationem continuam in membra tam minuta dissecuisse. Porro discolor est dictio: magniloquentia affectatur, sed nimis turgida illa atque effusa, nec sententiarum pondere satis suffulta. Denique nihil fere novi affertur: amplificantur prius dicta, rarius aliquid ex capite sequente anticipatur. Si quis appendices hosce legendo transiliat, sentiet slocum ultimum cum primo capitis proximi apte coagmentatum, nec sine vi quadam inde avulsum. Eiusmodi versus exhibet utraque recensio, sed modo haec modo illa plures paucioresve numero, et lectio interdum magnopere variat.

Longe diversa est, quatenus explorare potui, ratio numerorum lyricorum in Bha-

rateide, quibus Bhagavad-Gitae episodium quasi claris luminibus hinc inde distinctum est, caput eius undecimum paene integrum conscriptum; nec non in exordio nobilissimum illud Dhritarashtri vaticinium. Intexti sunt ipsi carminis corpori, ut sine gravi nexus damno nihil eorum omitti queat. Stilus quoque praestantissimo poeta est dignus: maiestas cum brevitate coniuncta; vibrant sententiae, et nescio quid instinctus divinioris spirant. Metrum vero simile quidem, sed multo liberius, quemadmodum patebit cognoscere volentibus e schemate in praefatione mea ad Bhagavad-Gitam delineato. Nam in ceteris cuiusque hemistichii sedibus praeter ultimam, quae ditrochaeum postulat, varii pedes admittuntur. Contra in distichis lyricis Rameidos semper idem servatur ordo. Apparet autem, apud Indos arte poetica doctius exculta, et sero tandem in nugas difficiles degenerante, rem metricam severioribus subinde legibus fuisse adstrictam. Ideo metra monoschematica, in quibus pariter atque in strophis Graecorum melicis, singularum syllabarum quantitas certo ordine definitur, ad aetatem recentiorem referenda arbitror.

Ne quis, editione Sriramapurensi forte cum nostra comparata, quum illam multo auctiorem viderit, propter tot centenos versus eiectos nimiae temeritatis et piaculi in Valmicis manes admissi me reum agat, accuratissimam aestimationem proponam. Complectitur liber carminis primus secundum recensionem commentatorum disticha 2328. Ad calcem codicum Telinganorum annotantur 2230; quae summae differentia non tam e versibus omissis orta est, quam e diverso numerandi modo. Nempe admittunt librarii slocos ternorum versuum: ego versus ubique per paria iunxi, et versum compare viduum in fine capitis pro integro sloco annumeravi. Editio mea exhibet disticha 2316, ut vix ulla iactura facta esse videatur. At re vera aliquanto maior est numerus versuum, quos exulare iussi, siquidem nonnulli assumti sunt ex recensione Bengalica et codicibus mixti generis.

Grammatici Bengali in computationum capite primum librum distichis 2850 aestimant. (Cf. ED. SR. L. I. CAP. III, sl. 29.) Videtis, quantum intersit. Quod si tantundem in ceteris libris excedit commentatorum recensionem Bengalica, debet illa longe infra nume-

rum quater et vicies millenarium subsistere. Neque vituperandi sunt critici, qui primi textum commentatorum ordinarunt, quod promissis parum steterint: utpote qui nihil de numero versuum spoponderant, nec demiserant se ad computationem istam Bengalicam librorum, capitum ac distichorum. Exhibent sane codices in exordio capitis nostri quarti hoc distichon:

> चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः ।
> तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरं ॥

Sed id aperte spurium est, male concinnatum, et ne ad grammatices quidem normam exactum. Confugit versificator in metri angustiis ad soloecismos: finxit novam formam विंशत् pro विंशतिः ad analogiam numerorum maiorum त्रिंशत् चत्वारिंशत्, plane ac si quis Latine *viginta* pro *viginti* diceret; usurpavit शत genere masculino, utrumque inauditum. Sine dubio facta fraus a librariis, ne sua exemplaria ab altera recensione pleniore carminis ambitu superari viderentur.

Mallem tacere de editione Sriramapurensi: sed aliquid dicendum est, ut lector intelligat, cur nostra immensum quantum distet ab illa.

Per annos 1806 — 1810 GUILELMUS CAREY et JOSUA MARSHMAN, iam per aliquot annos tunc in Bengalia commorati, a Societate Asiatica Calcuttensi eiusdemque urbis Academia linguarum Orientalium liberalissima remuneratione excitati, primum et secundum librum Ramayani cum interpretatione Anglica tribus voluminibus publici iuris fecere. Secundum volumen naufragio periit, pauca eius exemplaria in Europam allata sunt, quorum unum debeo liberalitati Viri illustris et mihi amicissimi, IACOBI MACKINTOSH. Egregiis praesidiis muniti fuerunt editores Angli: habuerunt codices utriusque recensionis; commentarios Tirthi, Ramae et Cataci, nisi hunc ex isto laudaverunt; fortasse et alia mihi ignota. Quibus copiis quam pravo iudicio, quamque oscitanter abusi sint verius quam usi, mihi vel invito, quum idem opus post eos suscepissem, cognoscere necesse fuit. Criticae artis ne nomen quidem fando accepisse homines dixeris. Affuerunt iis ad manum litterati Indi, vulgo *Pan'd'iti* dicti, qui textum apparavisse videntur. Sequuti sunt plerumque Bengalos; quando in mentem iis venit, transierunt ad commentatores; est quoque, ubi utriusque recensionis

lectiones cumularunt; nonnulla unde sumserint, ignoro. Nempe putarunt boni viri, quicquid versuum undecunque congeri potuisset, id Valmici acceptum esse referendum. Queruntur saepius editores Angli de repetitionibus, sed aiunt Panditos quippiam loco moveri vetuisse, quia versuum summa, paucis sublatis, non amplius foret quadratura ad numerum in computationum capite praescriptum. Ridiculum hercle! Non animadverterunt editores, semetipsos numerum excessisse, (habent enim in libro primo slocos 2907,) et salva ista lege sacratissima quinquaginta septem slocis spuriis aut supervacuis textum purgari potuisse. Calculum subduxi iuxta ipsorum numerationem, neglectis slocis ternorum versuum, qui passim intercurrunt. Modicus hic est error: at incredibile dictu, quanta cum licentia versati sint in libro secundo: insunt ei sloci quaternorum versuum, quinorum, senorum et amplius; unus aliquis in viginti novem, alius in triginta novem versus excurrit. Quid, obsecro, istuc est ineptiarum? Num sperarunt, tam stolido artificio quempiam falli posse? Scilicet conati sunt Panditi in ordinem cogere librum alienis additamentis in-

flatum, et extundere ad speciem quomodocunque numerum legitimum slocorum secundum recensionem Bengalicam; sed tamen id ipsum non omnino effecerunt. Audacter quidem ad calcem annotavere summam 4170, quae huic libro in computationum capite tribuitur (Cf. ED. SR. L. I, CAP. III, sl. 42, 43); re vera autem ex numeris margini adscriptis paulo plures, 4208 sloci, prodeunt. Quod si singuli versus ubique per paria copulentur, apparebit editores ducenis minimum distichis summam praefinitam excessisse.

Tironum tantum gratia moneo, interpretationem Anglicam sententiis perperam intellectis, textum mendis scatere. Nihil dico de malignitate editorum in rebus Indicis iudicandis: latrent sane, quantum libuerit, contra immortalem Valmicis umbram. Quamvis nulla ex parte non sit pessima editio Sriramapurensis, nihilominus sedulo eam evolvi, codicis vice, si forte unam alteramve lectionem offerret, meliorem quam ut sive ab editoribus, sive amanuensibus eorum excogitari potuerit.

Emendationibus quam religiosissime abstinui, nec, nisi in locis desperatis, quicquam

e coniectura in textum intuli. Sunt igitur emendationes paucae numero, eaeque levissimae, quippe quae plerumque unius litterulae mutatione absolvantur.

Quorum omnium accurate ratio reddetur in annotationibus criticis separatim edendis. Varia lectio Bengalica quidem propter perpetuum cum commentatoribus dissensum excerpi nequit: carmen integrum denuo foret describendum, ut, quid cuique respondeat, funditus perspiceretur. E codicibus alterius recensionis, cui ego me applicui, varietas, certe quae alicuius sit momenti, praesertim quid inter priorem et alterum commentarium intercedat, diligenter enotabitur; adscribentur versus e textu eiecti; indicabitur denique, unde depromserim ea, quae in commentatorum recensione non leguntur.

Codices supra memoratos partim exscripsit, partim exemplarium eiusdem ordinis collationem instituit, hunc in finem per annos tres continuos Londini et Parisiis commoratus, *Christianus Lassen*, Normannus Bergensis, Phil. Dr., olim discipulus meus, nunc fidissimus alborum socius. Iuvenis impiger, eximiae in studiis difficillimis perseverantiae,

qui duplici iam specimine harum rerum peritis doctrinam suam ingeniique acumen approbavit *), si quid mihi interim acciderit, quo minus Rameidos editionem ad finem perducere possim, continuandam suscipiet, quod eum pari cum fide atque industria facturum esse, spondere haud recuso.

Non silentio sunt praetereundi tot viri illustres, qui, tum mihi discipuloque aditu ad bibliothecarum thesauros faciliore concesso, tum notitiis utilibus mecum communicatis, denique ipso favore suo et bona opinione concepta, in opere arduo aggrediundo me adiuvarunt, et alacritatem meam interdum deficientem suscitarunt. Prae ceteris memorandi in Magna Britannia: CAROLUS WILKINS, Nestor ille studiorum Sanscritorum, bibliothecae in Curia Indica praepositus; HUMPHREDUS DAVY, *Bart.*, olim Praeses Soc. Reg. Scientt. Londinensis, et V. Cl. LEA, bibliothecae eiusdem societatis custos; IACOBUS TOD, Trib. mil.; H. T. COLEBROOKE, olim Senator in Concilio Indico

*) Essai sur le *Pali*, ou langue sacrée de la presqu'île au-delà du Gange par *E. Burnouf* et *Chr. Lassen.* Paris 1826. — *Christiani Lassenii*, Norvagi, Commentatio geographica atque historica de *Pentapotamia Indica.* Bonnae 1827.

et Praeses Soc. As. Calcuttensis, nunc soc. As. Londin. Rector; G. H. NOEHDEN, popularis noster, eidem Societati, dum inter vivos agebat a litteris, et antiquitatum Musei Britannici inspector; IOANNES MALCOLM, eques, Praefectus provinciae Bombaiae; IACOBUS MACKINTOSH, eques, olim Praetor iuri dicundo in eadem provincia; ALEXANDER JOHNSTON, eques, olim Praetor in insula Taprobane, G. C. HAUGHTON, olim linguae Sanscritae et Bengalicae in Acad. Hayleybur. Professor; in Gallia: ABEL REMUSAT, linguae Sinicae Prof., et Conservator Codd. Mss. Bibl. Reg. Parisiensis; inter nostrates par nobile fratrum, GUILELMUS et ALEXANDER DE HUMBOLDT. Qui viri, vix satis dignis laudibus praedicandi, ut publicam hanc grati animi significationem pro consueta sua erga me benevolentia accipere velint, enixe oro rogoque.

Quod autem per Germaniam litterae Indicae, novum eruditionis genus, haud infelici successu coli coeptae sunt, id totum debetur munificentiae REGIS Borussorum augustissimi, cuius auspiciis, humanitatis cultu cum armorum gloria coniuncto, disciplinae artesque elegantiores florent et laetiora in dies incrementa capiunt. Veneror patronum generosis-

simum, qui in hac Universitate Rhenana, cuius ipse est Conditor atque Stator, mihi post varia fata multosque labores exantlatos honestum otium fecit, quod studiis suavissimis et monumento nominis mei apud posteros condendo consecrare possem. Gratulor mihi quod, summo Numine favente, licuit tantum opus inchoare; gaudeo et glorior, quod mea quoque opera post tot secula confirmatur antiquum istud oraculum, in Rameidos exordio sub persona Patris hominumque Deûmque Valmicem alloquentis prolatum:

> Dum stabunt montes, campis dum flumina current,
> Usque tuum toto carmen celebrabitur orbe.
>
> I. 2. 39

*Scribebam in Univers. Fridericia Guilelmia Calendis Martiis, a.* 1829.

*A. G. a* SCHLEGEL.

अथ

# रामायणे वाल्मीकीये

## वालकाण्डं

---

# RAMEIDOS

## LIBER PRIMUS.

PROOEMIA

IN LAUDEM POETAE.

---

न्तं राम रामेति मधुरं मधुराक्षरं ।
ह्य कविताशाखां वन्दे वाल्मीकिकोकिलं ॥

ल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
वन् रामकथानादं को न याति परां गतिं ॥

ल्मीकिगिरिसंभूता रामसागरगामिनी ।
ाति भुवनं पुण्या रामायणमहानदी ॥

पिबन् सततं रामचरितामृतसागरं ।
स्तं मुनिं वन्दे प्राचेतसमकल्मषं ॥

स्तस्मै मुनीशाय श्रीगुप्ताय तपस्विने ।
ज्ञानाधिवासाय वाल्मीकये नमो नमः ॥

---

# LIBER PRIMUS.

## CAPUT I.

### ARGUMENTUM CARMINIS
### NARADAE SERMONE DECLARATUM.

---

॥ ओं ॥

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरं ।
नारदं परिपप्रछ वाल्मीकिर्मुनिपुंगवः ॥ १ ॥
को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २ ॥
चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः को वदान्यश्च कश्चैकः प्रियदर्शनः ॥ ३ ॥
आत्मवान् को जितक्रोधो धृतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥ ४ ॥
क उदारः समर्थश्च त्रैलोक्यस्यापि रक्षणे ।
कः प्रजानुग्रहरतः को निधिर्गुणसंपदां ॥ ५ ॥

समग्रा रूपिणी लक्ष्मीः कमेकं संश्रिता नरं ।
अनिलानलसूर्येन्दुशक्रोपेन्द्रसमश्च कः ॥ ६ ॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
देवर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरं ॥ ७ ॥
श्रुत्वा चैतत् त्रिकालज्ञो वाल्मीकेर्नारदो वचः
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥ ८ ॥
बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः ।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ ९ ॥
इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥ १० ॥
बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ ११ ॥
महोरस्को महेष्वासो गूढजत्रुररिंदमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १२ ॥
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः ॥ १३ ॥
धर्मज्ञः सत्यसंधश्च जितक्रोधो जितेन्द्रियः ।
मनस्वी ज्ञानसंपन्नः शुचिर्वीर्यसमन्वितः ॥ १४ ॥
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ।
वेदवेदाङ्गविच्चैव धनुर्वेदे च निष्ठितः ॥ १५ ॥

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ १६ ॥
सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
रामः सर्वगुणोपेतः कौशल्यानन्दवर्धनः । ॥ १७ ॥
समुद्र इव गाम्भीर्ये स्थैर्ये च हिमवानिव ।
विष्णुना सदृशो वीर्ये सोमवत् प्रियदर्शनः ॥ १७ ॥
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ।
धनदेन समस्त्यागे सत्ये धर्म इवापरः ॥ १९ ॥
तमेवंगुणसंपन्नं रामं सत्यपराक्रमं ।
ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतं ॥ २० ॥
यौवराज्येन संयोक्तुमैच्छत् प्रीत्या महीपतिः ।
तस्याभिषेकसंभारान् दृष्ट्वा भार्याथ कैकयी ॥ २१ ॥
पूर्वं दत्तवरा राज्ञा वरावेतावयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनं ॥ २२ ॥
स सत्यवचनाद्राजा धर्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियं ॥ २३ ॥
स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ॥ २४ ॥
तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसंपन्नः सौभ्रात्रमनुदर्शयन् ॥ २५ ॥

रामस्य दयिता भार्या नित्यं प्राणसमाहिता ।
जनकस्य कुले जाता देवमायेव निर्मिता ॥ २६ ॥
सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः ।
सीताप्यनुगता रामं शशिनं रोहिणी यथा ॥ २७ ॥
पौरैरनुगतो दूरं पित्रा दशरथेन च ।
शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ॥ २८ ॥
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियं ।
स ततार ततो गङ्गां वनं चैव विवेश ह ॥ २९ ॥
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ।
चित्रकूटमनुप्राप्ता भरद्वाजस्य शासनात् ॥ ३० ॥
रम्यमावसथं तत्र कृत्वा रामः सलक्ष्मणः ।
उवास सीतया सार्द्धं वल्कलाजिनसंवृतः ॥ ३१ ॥
श्रीमद्भिस्तैस्त्रिभिः सार्द्धं चित्रकूटो रराज सः ।
अधिष्ठितो यथा मेरुः श्रीवैश्रवणशङ्करैः ॥ ३२ ॥
चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ।
राजा दशरथः स्वर्गं जगाम विलपन् सुतं ॥ ३३ ॥
मृते तु तस्मिन् भरतो वशिष्ठप्रमुखैर्द्विजैः ।
प्रचोदितोऽपि राज्याय नैच्छद्राज्यं महाबलः ॥ ३४ ॥
स जगाम वनं वीरो रामपादप्रसादकः ।
अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ॥ ३५ ॥

त्वमेव राजा धर्मज्ञ इति रामं वचो ऽब्रवीत् ।
न चैच्छत् पितुरादेशाद्राज्यं रामो महाबलः ॥ ३६ ॥
पादुके चास्य राज्याय न्यासं दत्वा पुनः पुनः ।
निवर्तयामास ततो भरतं भरताग्रजः ॥ ३७ ॥
स काममनवाप्यैव गृहीत्वा रामपादुके ।
नन्दिग्रामे ऽकरोद्राज्यं रामागमनकाङ्क्षया ॥ ३८ ॥
आशङ्कमानश्च पुनः पौरजानपदागमं ।
रामो ऽपि हित्वा तं शैलं प्रययौ दण्डकं वनं ॥ ३९ ॥
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ।
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ॥ ४० ॥
अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनं ।
खड्गं च परमप्रीतस्तूणी चाक्षय्यशायकौ ॥ ४१ ॥
वसतस्तत्र रामस्य वने वनचरैः सह ।
ऋषयो ऽभ्यागमन् सर्वे वधायासुररक्षसां ॥ ४२ ॥
रामं कमलपत्राक्षं शरण्यं शरणैषिणः ।
महेन्द्रमिव दुर्धर्षं बाणखड्गधनुर्धरं ॥ ४३ ॥
तेन तत्र सह भ्रात्रा जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी काममोहिता ॥ ४४ ॥
ततः शूर्पणखावाक्यादुद्युक्तान् सर्वराक्षसान् ।
खरं च दूषणं चैव रक्षस्त्रिशिर एव च ॥ ४५ ॥

घान रणे राम एकस्तान् सर्वराक्षसान् ।
मनुबलं चैव सहस्राणि चतुर्दश ॥ ४६ ॥
ज्ञातिबधं श्रुत्वा रक्षस्त्रैलोक्यविश्रुतं ।
तो रावणो नाम कामरूपी महाबलः ॥ ४७ ॥
ाधिपतिः शूरो रावणः क्रोधमूर्छितः ।
यं वरयामास मारीचं नाम राक्षसं ॥ ४८ ॥
माणो ऽपि बहुशो मारीचेन स रावणः ।
विरोधो बलवता क्षमो रावण तेन ते ॥ ४९ ॥
दृत्य तु तद्वाक्यं रावणः कालचोदितः ।
म सहमारीचो रामाश्रमपदं तदा ॥ ५० ॥
मायाविना दूरमपवाह्य नृपात्मजौ ।
र् भार्यां रामस्य गृध्रं हत्वा जटायुषं ॥ ५१ ॥
च निहतं दृष्ट्वा हृतां भार्यां च मैथिलीं ।
ो शोकसंतप्तो विललापाकुलेन्द्रियः ॥ ५२ ॥ नः
तेनैव शोकेन गृध्रं दग्ध्वा जटायुषं ।
माणो वने सीतां राक्षसं संददर्श ह ॥ ५३ ॥
न्धं नाम रूपेण विकृतं घोरदर्शनं ।
त्वा काष्ठैरदहत् सो ऽभूद्दिव्यवपुस्तदा ॥ ५४ ॥
ास्य कथयामास शबरीं श्रमणां तदा ।
रीं धर्मनिपुणामभिगच्छेति राघव ॥ ५५ ॥

तस्यैव वचनाद्रामो लक्ष्मणेन सहानघः ।
अभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः ॥ ५६ ॥
शबर्या पूजितः सम्यग्रामो दशरथात्मजः ।
पम्पातीरे हनुमता संगतो वानरेण ह ॥ ५७ ॥
हनुमद्वचनाच्चैव सुग्रीवेण समागतः ।
सुग्रीवाय च तत् सर्वं रामोऽशंसन्महाबलः ॥ ५८ ॥
सुग्रीवश्चापि तत् सर्वं श्रुत्वा रामस्य चेष्टितं ।
चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकं ॥ ५९ ॥
ततो वानरराजेन वैरानुकथनं महत् ।
रामायावेदितं सर्वं प्रणयाद्दुःखितेन ह ॥ ६० ॥
प्रतिज्ञातं च रामेण तदा बालिबधं प्रति ।
बालिनश्च बलं तत्र कथयामास वानरः ॥ ६१ ॥
राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमं ।
दर्शयामास सुग्रीवो महापर्वतसंनिभं ॥ ६२ ॥
उत्स्मायित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।
पादांगुष्ठेन चिक्षेप संपूर्णं दशयोजनं ॥ ६३ ॥
बिभेद सप्ततालांश्च शरेणानतपर्वणा ।
गिरिं रसातलं चैव जनयन् प्रत्ययं तदा ॥ ६४ ॥
ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।
किष्किन्धां रामसहितो जगाम स्वां गुहां तदा ॥ ३५ ॥

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।
तेन नादेन महता निर्जगाम हरीश्वरः ॥ ६६ ॥
अवमान्य तदा तारां सुग्रीवेण समागतः । अनु
निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६७ ॥
ततः सुग्रीववचनाद्धत्वा बालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ ६८ ॥
स च सर्वान् समानीय वानरान् वानरर्षभः ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजां ॥ ६९ ॥
ततो गृध्रस्य वचनात् संपातेर्हनुमान् बली ।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवं ॥ ७० ॥
तत्र लङ्कां समासाद्य पुरीं रावणपालितां ।
ददर्श सीतां ध्यायन्तीमशोकवनिकागतां ॥ ७१ ॥
निवेदयित्वाभिज्ञानं प्रवृत्तिं विनिवेद्य च ।
गृहीत्वा प्रत्यभिज्ञानं मर्दयामास तोरणं ॥ ७२ ॥
पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि ।
कुमारमक्षं निष्पिष्य ग्रहणं समुपागमत् ॥ ७३ ॥
अस्त्रेणोन्मुच्य चात्मानं ज्ञात्वा पैतामहान् वरान् ।
ममर्ष राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥ ७४ ॥
ततो दग्ध्वा पुरीं लङ्कां पुनर्दृष्ट्वा च मैथिलीं ।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ ७५ ॥

सो ऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणं ।
न्यवेदयत् स सुप्रीतो दृष्टा सीता मयेति वै ॥ ७६ ॥
ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।
समुद्रं क्षोभयामास शरैरादित्यसंनिभैः ॥ ७७ ॥
दर्शयामास चात्मानं समुद्रः सरितांपतिः
समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ ७८ ॥
तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।
अभ्यषिञ्चत् स लङ्कायां राक्षसेन्द्रं विभीषणं ॥ ७९ ॥
रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ।
तामुवाच ततो वीरः परुषं जनसंसदि ॥ ८० ॥
अमृष्यमाणा सा सीता विवेश ज्वलनं सती ।
ततो वायुः प्रादुरासीद्वागुवाचाशरीरिणी ॥ ८१ ॥
ततो ऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषां ।
अग्रहीदमलां रामो वचनाच्च गुरोस्तदा ॥ ८२ ॥
कर्मणा तेन महता देवा इन्द्रपुरोगमाः ।
सदेवर्षिगणास्तुष्टा राघवं ते ऽभ्यपूजयन् ॥ ८३ ॥
तथा परमसंतुष्टैः पूजितः सर्वदैवतैः ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८४ ॥
देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।
पुष्पकं च समारुह्य नन्दिग्रामं ययौ तदा ॥ ८५ ॥

नन्दिग्रामे जटां हित्वा भ्रातृभिः सह राघवः
अयोध्यां नगरीं प्राप्य राज्यं पुनरवाप्तवान् ॥ ८६ ॥
हृष्टः प्रमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः
निरामयो ह्यरोगश्च दुर्भिक्षापायवर्जितः ॥ ८७ ॥
न पुत्रमरणं केचित् पश्यन्ति स्म नराः क्वचित् ।
नार्यश्चाविधवा नित्यं पतिशुश्रूषणे रताः ॥ ८८ ॥
न चाग्निजं भयं किंचिन्नाप्सु मज्जन्ति जन्तवः ।
न वातजं भयं किंचिन्न तस्करभयं तथा ॥ ८९ ॥
नगराणि च राष्ट्राणि धनधान्ययुतानि च ।
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ॥ ९० ॥
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ।
असंख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः ॥ ९१ ॥
राजवंशान् शतगुणान् स्थापयिष्यति राघवः ।
चातुर्वर्ण्यं च लोके ऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ॥
दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥ ९३ ॥

इदं पवित्रमाख्यानं पुण्यं वेदैश्च संमितं ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ ९४ ॥

एतदाख्यानमायुष्यं पठन् रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ १५ ॥

पठन् द्विजो वागृषभत्वमीयात्
क्षत्रान्वयो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यपतित्वमीयाच्-
छृण्वन् हि शूद्रोऽपि महत्त्वमीयात् ॥ १६ ॥

इत्यार्षे रामायणे वाल्मीकीये चतुर्विंशतिसाहस्र्यां संहितायां बालकाण्डे नारदवाक्ये काव्यसंक्षेपो नाम प्रथमः सर्गः ॥ १ ॥

---

## CAPUT II.

### BRAHMANIS ADVENTUS.

नारदस्याथ तद्वाक्यं श्रुत्वा वाक्यविशारदः ।
वाल्मीकिः शिष्यसहितो विस्मयं परमं ययौ ॥ १ ॥
मनसैव च रामाय पूजां चक्रे महामुनिः ।
तं चापि शिष्यसहितो नारदं प्रत्यपूजयत् ॥ २ ॥

ावत् पूजितस्तेन देवर्षिर्नारदस्ततः ।
ापृच्छ्याभ्यनुज्ञातो जगाम त्रिदशालयं ॥ ३ ॥
मुहूर्त्तं गते तस्मिन् देवलोकं मुनिस्तदा ।
ाम तमसातीरं जाह्नव्या अविदूरतः ॥ ४ ॥
् तु तीरं समासाद्य तमसाया मुनिस्तदा ।
ष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमं ॥ ५ ॥
र्दममिदं तीर्थं भरद्वाज निशामय ।
णीयं प्रसन्नं च सज्जनानां मनो यथा ॥ ६ ॥
तीर्थं समं सौम्यं सुजलं सूक्ष्मबालुकं ।
स्यतां कलसस्तात दीयतां वल्कलं मम ॥ ७ ॥
मेवावगाहिष्ये तमसातीर्थमुत्तमं ।
ा कालात्ययो न स्यात् तथा साधु विधीयतां ॥ ८ ॥
गुरोर्वचनाच्छीघ्रमागम्य पुनराश्रमात् ।
नीय वल्कलं तस्मै गुरवे प्रत्यवेदयत् ॥ ९ ॥
शिष्यहस्तादादाय परिधाय च वल्कलं ।
गाह्य जलं स्नात्वा जप्त्वा जप्यं च वाग्यतः ॥ १० ॥
यित्वा च विधिवत् तोयेन पितृदेवताः ।
ीक्षमाणो व्यचरत् सर्वतो विपुलं वनं ॥ ११ ॥
ः स तमसातीरे विचरतोरभीतवत् ।
ी क्रौञ्चयोस्तत्र मिथुनं चारुदर्शनं ॥ १२ ॥

तस्मात् तु मिथुनादेकमागत्यानुपलक्षितः ।
जघान वैरनिलयो निषादो मुनिसंनिधौ ॥ १३ ॥
तं शोणितपरीताङ्गं चेष्टमानं महीतले ।
दृष्ट्वा क्रौञ्ची रुरोदार्ता करुणं खे परिभ्रमा ॥ १४ ॥
वियुक्ता पतिना तेन द्विजेन सहचारिणा ।
ताम्रशीर्षेण मत्तेन पत्रिणा सहितेन वै ॥ १५ ॥
तथाविधं द्विजं दृष्ट्वा निषादेन निपातितं ।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समजायत ॥ १६ ॥
ततः कारुण्यवेदित्वादधर्मो ऽयमिति द्विजः ।
निशम्य करुणां क्रौञ्चीं क्रन्दन्तीं तां जगाविदं ॥ १७ ॥
मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितं ॥ १८ ॥
तस्यैवं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ।
शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया ॥ १९ ॥
स मुहूर्तमनुध्यात्वा वाक्यं तत् परिमृश्य च ।
शिष्यमाह स्थितं पार्श्वे भरद्वाजमिदं वचः ॥ २० ॥
पादबद्धो ऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥ २१ ॥
शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमं ।
तथेति प्रतिजग्राह गुरोः प्रीतिं विदर्शयन् ॥ २२ ॥

सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन् यथाविधि ।
तमेव चिन्तयन्नर्थमाश्रमाय न्यवर्तत ॥ २३ ॥
तमन्वयाद्विनीतात्मा भरद्वाजो महामुनिं ।
पूर्णं कलसमादाय शिष्यः परमसंमतः ॥ २४ ॥
स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् ।
उपविश्याश्रमे तूष्णीं ध्यानमेवान्वपद्यत ॥ २५ ॥
आजगाम ततो ब्रह्मा लोककर्ता स्वयं प्रभुः ।
चतुर्मुखो महातेजा द्रष्टुं तमृषिसत्तमं ॥ २६ ॥
वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः ।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः ॥ २७ ॥
प्रणम्य विधिवच्चैनं पृष्ट्वानामयमव्ययं ।
पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः ॥ २८ ॥
अथोपविश्य भगवान् आसने परमार्चिते ।
वाल्मीकये च ऋषये संदिदेशासनं ततः ॥ २९ ॥
उपविष्टे तदा तस्मिन् साक्षाल्लोकपितामहे ।
तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ॥ ३० ॥ ध्या
शोचन्नेव मुहुः क्रौञ्चीं श्लोकमिमं पुनः पुनः ।
जगावन्तर्गतमना भूत्वा शोकपरायणः ॥ ३१ ॥
पापात्मना कृतं कष्टं व्याधेनानर्थबुद्धिना ।
यस्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् ॥ ३२ ॥

तमुवाच ततो ब्रह्मा प्रहसन् मुनिपुंगवं ।
श्लोक एव त्वया बद्धो नात्र कार्या विचारणा ॥ ३३ ॥
स्वछन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती ।
रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम ॥ ३४ ॥
धर्मात्मनो गुणवतो लोके रामस्य धीमतः ।
वृत्तं कथय धीरस्य यथा ते नारदाच्छ्रुतं ॥ ३५ ॥
रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ।
रामस्य सहसौमित्रे राक्षसानां च सर्वशः ॥ ३६ ॥
वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदिवा रहः ।
तच्चाप्यवितथं सर्वं विदितं ते भविष्यति ॥ ३७ ॥
न ते वागनृता काव्ये मत्प्रसादाद्भविष्यति ।
कुरु रामकथां दिव्यां श्लोकबद्धां मनोरमां ॥ ३८ ॥
यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥ ३९ ॥
यावद्रामायणकथा त्वत्कृता प्रचरिष्यति ।
तावदूर्द्ध्वगतिश्चैव मल्लोकेषु निवत्स्यसि ॥ ४० ॥
इत्युक्त्वा भगवान् ब्रह्मा तत्रैवान्तरधीयत ।
ततः सशिष्यो वाल्मीकिर्विस्मयं परमं ययौ ॥ ४१ ॥
तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः ।
मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः ॥ ४२ ॥

समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा ।
सो ऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः ॥ ४३ ॥
तस्य बुद्धिरियं जाता महर्षेर्भावितात्मनः ।
कृत्स्नं रामायणं श्लोकैरीदृशैः करवाण्यहं ॥ ४४ ॥

उदारवृत्तार्थपदैर्मनोरमैस्-
ततः स रामस्य चकार कीर्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारधीर्मुनिः ॥ ४५ ॥

इति बालकाण्डे ब्रह्मागमनं नाम द्वितीयः सर्गः ॥ २ ॥

---

## CAPUT III.

### ARGUMENTI COMPENDIUM.

श्रुत्वा पूर्वं काव्यबीजं देवर्षेर्नारदादृषिः ।
लोकादन्विष्य भूयश्च विस्तरं चरितव्रतः ॥ १ ॥
उपस्पृश्योदकं सम्यङ्मुनिः स्थित्वा कृताञ्जलिः ।
प्राचीनाग्रेषु दर्भेषु काव्यस्यान्वेषते गतिं ॥ २ ॥

रामलक्ष्मणसीताभी राज्ञा दशरथेन च ।
सभार्येण सराष्ट्रेण सान्तःपुरजनेन च ॥ ३ ॥
ग्रासितं भाषितं चैव गतं यञ्चाप्यनुष्ठितं ।
तत् सर्वं धर्मवीर्येण यथावत् संप्रपश्यति ॥ ४ ॥
स्त्रीतृतीयेन च तदा यत् प्राप्तं चरता वने ।
सत्यसंधेन रामेण तत् सर्वमन्ववैक्षत ॥ ५ ॥
त्रिकालदर्शी तत् सर्वं तपोयोगबलेन तु ।
ददर्श तत्र प्रत्यक्षं पाणावामलकं यथा ॥ ६ ॥
दृष्ट्वा चानन्तरं सम्यक् चक्रे रामस्य चेष्टितं ।
समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरं ॥ ७ ॥
स यथा कथितं पूर्वं नारदेन महात्मना ।
रघुवंशस्य चरितं चकार भगवान् मुनिः ॥ ८ ॥
जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलतां ।
लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यशीलतां ॥ ९ ॥
नानाचित्राः कथाश्चान्या विश्वामित्रसहायने ।
जानक्याश्च विवाहं च धनुषश्चापि भञ्जनं ॥ १० ॥
रामरामविवादं च गुणान् दाशरथेस्तदा ।
तथाभिषेकं रामस्य कैकेय्या दुष्टभावतां ॥ ११ ॥
विघातं चाभिषेकस्य रामस्य च विवासनं ।
राज्ञः शोकं विलापं च मोहं मरणमेव च ॥ १२ ॥

प्रकृतीनां विषादं च तथैव च विसर्जनं ।
निषादाधिपसंवादं सूतस्य च निवर्तनं ॥ १३ ॥
गङ्गायाश्चापि संतारं भरद्वाजस्य दर्शनं ।
भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनं ॥ १४ ॥
वास्तुकर्म निवेशं च भरतागमनं तथा ।
प्रसादनं च रामस्य पितुश्च सलिलक्रियां ॥ १५ ॥
पादुकास्वभिषेकं च नन्दिग्रामे निवासनं ।
दण्डकारण्यगमनं सुतीक्ष्णेन समागमं ॥ १६ ॥
अनसूयासमास्यां च अङ्गरागस्य चार्पणं ।
शरभङ्गाश्रमे वासं वासवस्य च दर्शनं ॥ १७ ॥
दर्शनं चाप्यगस्त्यस्य धनुषो ग्रहणं तथा ।
समागमं विराधेन वासं पञ्चवटे तथा ॥ १८ ॥
हासं शूर्पणखायाश्च विरूपकरणं तथा ।
वधं खरत्रिशिरसोरुत्थानं रावणस्य च ॥ १९ ॥
मरीचस्य बधं चैव वैदेह्या हरणं तथा ।
राघवस्य विलापं च गृध्रराजनिवर्हणं ॥ २० ॥
कबन्धग्रहणं चैव पम्पायाश्चापि दर्शनं ।
शबर्या दर्शनं चैव हनूमद्दर्शनं तथा ॥ २१ ॥
विलापं चैव पम्पायां राघवस्य महात्मनः ।
ऋष्यमूकस्य गमनं सुग्रीवेण समागमं ॥ २२ ॥

प्रत्ययोत्पादनं सख्यं बालिसुग्रीवविग्रहं ।
बालिप्रमथनं राज्ये सुग्रीवप्रतिपादनं ॥ २३ ॥
ताराविलापं समयं वर्षरात्रिनिवासनं ।
कोपं राघवसिंहस्य बलानामुपसंग्रहं ॥ २४ ॥
दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनं ।
अंगुलीयप्रदानं च ऋक्षस्य बिलदर्शनं ॥ २५ ॥
प्रायोपवेशनं चापि संपातेश्चापि दर्शनं ।
पर्वतारोहणं चैव सागरस्य च लङ्घनं ॥ २६ ॥
समुद्रवचनाच्चैव मैनाकस्य च दर्शनं ।
सिंहिकायाश्च निधनं लङ्कानिलयदर्शनं ॥ २७ ॥
रात्रिप्रवेशं लङ्कायां चिन्तां हनुमतस्तथा ।
आपानभूमिगमनमवरोधस्य दर्शनं ॥ २८ ॥
अशोकवनिकायानं सीतायाश्चापि दर्शनं ।
संभाषणं च मैथिल्या अभिज्ञानस्य चार्पणं ॥ २९ ॥
मणिप्रदानं सीताया वृक्षभङ्गं तथैव च ।
राक्षसीविद्रवं चैव किङ्कराणां निबर्हणं ॥ ३० ॥
ग्रहणं वायुसूनोश्च लङ्कादाहाभिगर्जनं ।
प्रतिप्लवनमेवाथ मधूनां भक्षणं तथा ॥ ३१ ॥
राघवाश्वासनं चैव मणिनिर्यातनं तथा ।
संगमं च समुद्रेण नलसेतोश्च बन्धनं ॥ ३२ ॥

प्रतारं च समुद्रस्य रात्रौ लङ्कावरोधनं ।
विभीषणेन संसर्गं बधोपायनिवेदनं ॥ ३३ ॥
कुम्भकर्णस्य निधनं मेघनादनिवर्हणं ।
रावणस्य विनाशं च सीतावाप्तिं तथैव च ॥ ३४ ॥
विभीषणाभिषेकं च पुष्पकस्य च दर्शनं ।
ब्रह्मादिदेवागमनं सीतायाः प्रत्ययं प्रति ॥ ३५ ॥
पुष्पकारोहणं चैव भरद्वाजसमागमं ।
प्रेषणं वायुपुत्रस्य भरतेन समागमं ॥ ३६ ॥
रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनं ।
सीतायाश्च परित्यागं प्रकृतीनां च रञ्जनं ॥ ३७ ॥
अनागतं च यत् किंचिद्रामस्य वसुधातले ।
तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः ॥ ३८ ॥

इति वालकाण्डे काव्योपसंक्षेपो नाम तृतीयः सर्गः ॥ ३ ॥

## CAPUT IV.

### RHAPSODORUM INSTITUTIO.

कृत्वा तु तन्महाप्राज्ञः काव्यं रामायणाह्वयं ।
चिन्तयामास को न्वेतल्लोके ऽस्मिन् प्रथयेदिति ॥ १ ॥
तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः ।
अगृह्णीतां ततः पादौ मुनिवेशौ कुशीलवौ ॥ २ ॥
कुशीलवौ स धर्मात्मा राजपुत्रौ यशस्विनौ ।
भ्रातरौ स्वरसंपन्नौ ददर्शाश्रमवासिनौ ॥ ३ ॥
स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।
वेदोपग्रहणार्थाय तावग्राहयत प्रभुः ॥ ४ ॥
काव्यं रामायणं यत्र सीतायाश्चरितं महत् ।
पौलस्त्यबधसंयुक्तं श्रोतृश्रुतिसुखावहं ॥ ५ ॥
पाठे गेये च मधुरं प्रमाणैस्त्रिभिरन्वितं ।
जातिभिः सप्तभिर्बद्धं तन्त्रीलयसमन्वितं ॥ ६ ॥
शृङ्गारवीरबीभत्सरौद्रहास्यभयानकैः ।
करुणाद्भुतशान्तैश्च युक्तं काव्यरसैरपि ॥ ७ ॥
बहुमानाच्च वाल्मीकेः काव्यस्य च सुखादपि ।
वाग्विधेयं यदा ताभ्यां कृतं तच्चाप्यशेषतः ॥ ८ ॥

स तौ मूर्धन्युपाघ्राय वाल्मीकिर्भगवानृषिः ।
प्रोवाचेदं तदा वाक्यं प्रणतावग्रतः स्थितौ ॥ ९ ॥
गीयतामिदमाख्यानं भवद्भ्यामृषिसंसदि ।
राजर्षीणां पुण्यकृतां साधूनां च समागमे ॥ १० ॥
तौ तु गान्धर्वतत्त्वज्ञौ तालमूर्छनकोविदौ ।
भ्रातरौ स्वरसंपन्नौ गन्धर्वाविव रूपिणौ ॥ ११ ॥
विम्बादिवोद्धृतौ विम्बौ रामदेहात् तथापरौ ।
यथोपदिष्टमृषिणा जगतुः सुसमाहितौ ॥ १२ ॥
तौ कदाचित् समेतानामृषीणां भावितात्मनां ।
आसीनानां समीपस्थाविदं काव्यमगायतां ॥ १३ ॥
श्रुत्वा तु मुनयः सर्वे वाष्पपर्याकुलेक्षणाः ।
साधु साध्विति तावूचुः परं विस्मयमागताः ॥ १४ ॥
ते प्रीतमनसश्चैव मुनयो धर्मवत्सलाः ।
प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ ॥ १५ ॥
अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ।
चिरवृत्तमपि ह्येतत् प्रत्यक्षमिव दर्शितं ॥ १६ ॥
एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महर्षिभिः ।
संरक्ततरमत्यर्थं मधुरं तावगायतां ॥ १७ ॥
प्रीतः कश्चिन्मुनिस्ताभ्यां पानीयकलसं ददौ ।
कश्चिद्वनफलं स्वादु वल्कलं कश्चिदीप्सितं ॥ १८ ॥

अन्यः कृष्णाजिनं प्रादाद्यज्ञसूत्रमथापरः ।
कश्चित् कमण्डलुं प्रादान्मौञ्जीमन्यो महामुनिः ॥ १९ ॥
ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः ।
जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदान्वितः ॥ २० ॥
यज्ञभाण्डमृषिः कश्चित् काष्ठभारं तथापरः ।
औडुम्बरीं वृषीमन्यः स्वस्ति केचित् तथावदन् ॥ २१ ॥
आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः ।
ददुश्चैव वरान् सर्वे मुनयः सत्यवादिनः ॥ २२ ॥
एवं पूर्वमिदं काव्यं मुनिभिः प्रतिपूजितं ।
जीवभूतं मनुष्याणां कवीनामुपजीवनं ॥ २३ ॥
प्रशस्यमानौ सर्वत्र एतावपि हि गायनौ ।
राजधानीषु राज्ञां च समाजेष्वभ्यगायतां ॥ २४ ॥
अथाश्वमेधे रामो ऽपि तावुपश्रुत्य गायनौ ।
सत्कृत्यानाययामास पुरुषैराप्तकारिभिः ॥ २५ ॥
आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ।
उपोपविष्टः सचिवैर्भ्रातृभिश्च समन्वितः ॥ २६ ॥
दृष्ट्वाथ रूपसंपन्नौ विनीतौ भ्रातरावुभौ ।
उवाच लक्ष्मणं रामः सर्वांश्चैव सभासदः ॥ २७ ॥
श्रूयतामेतदाख्यानमनयोर्देववर्चसोः ।
विचित्रार्थपदं सम्यग्गायतोर्मधुरस्वरं ॥ २८ ॥

तौ चापि मधुरं रक्तं स्वचित्तायत्तनिस्वनं ।
तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायतां ॥ २९ ॥
ह्लादयत् सर्वगात्राणि मनांसि हृदयानि च ।
श्रोत्राशयसुखं गेयं तद्बभौ जनसंसदि ॥ ३० ॥

इमौ हि बालौ नृपलक्षणान्वितौ
कुशीलवौ चैव तपोवनाश्रयौ ।
ममेति वृत्तं किल गेयमद्भुतं
महर्षिवाल्मीकिकृतं प्रगास्यतः ॥ ३१ ॥

ततस्तु तौ राघवसंप्रचोदिताव्-
अगायतां काव्यमिदं यथाक्रमं ।
स चापि रामः सहितः सभासदैर्-
बभूव तत्रार्पितचेतनस्तदा ॥ ३२ ॥

इति बालकाण्डे कुशीलवयोरध्यापनं नाम चतुर्थः सर्गः
॥ ४ ॥

## CAPUT V.

## URBIS AYODHYAE DESCRIPTIO.

---

### PROOEMIUM RHAPSODORUM.

सागरान्ता मही येषामासीद्वीर्यार्जिता किल ।
आमनोः पुण्यकीर्तीनां राज्ञाममिततेजसां ॥ १ ॥
सगरः पूर्वजो येषां सागरो येन खानितः ।
षष्टिपुत्रसहस्राणि यं यान्तं पर्यवारयन् ॥ २ ॥
इक्ष्वाकूणामिदं तेषां राज्ञां वंशे महात्मनां ।
महदुत्पन्नमाख्यानं रामायणमिति श्रुतं ॥ ३ ॥
तदिदं वर्तयिष्यावः सर्वं निखिलमादितः ।
धर्मकामार्थसंयुक्तं श्रोतव्यमनसूयता ॥ ४ ॥

---

कोशलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे पशुधान्यधनर्द्धिमान् ॥ ५ ॥
अयोध्या नाम तत्रास्ति नगरी लोकविश्रुता ।
मनुना मानवेन्द्रेण पुरैव निर्मिता स्वयं ॥ ६ ॥
आयता दश च द्वे च योजनानि महापुरी ।
श्रीमती त्रीणि विस्तीर्णा नानासंस्थानशोभिता ॥ ७ ॥

सुविभक्तान्तरद्वारा सुविभक्तमहापथा ।
शोभिता राजमार्गेण जलसंसिक्तरेणुना ॥ ८ ॥
अविच्छिन्नान्तरगृहा समभूमौ निवेशिता ।
कपाटतोरणवती हर्म्यप्रासादसंकुला ॥ ९ ॥
दृढद्वारप्रतोलीका सुविभक्तान्तरायणा ।
दुर्गगम्भीरपरिखा नानायुधसमन्विता ॥ १० ॥
राजा दशरथो नाम महात्मा राष्ट्रवर्धनः ।
तां पुरीं पालयामास स्वपुरीं मघवानिव ॥ ११ ॥
उद्यानाम्रवनोपेतां सुमहाशालमेखलां ।
अष्टापदपदालेख्यै रम्यामालिखितामिव ॥ १२ ॥
सभोद्यानप्रपाभिश्च रुचिराभिरलंकृतां ।
देवतायतनैश्चैव विमानैरपि शोभितां ॥ १३ ॥
नित्योत्सवसमाजाढ्यां हृष्टपुष्टजनैर्युतां ।
आरोहमिव रत्नानां प्रतिष्ठानमिव श्रियः ॥ १४ ॥
वरान्नपानकलिलां शालितण्डुलभोजनां ।
धूपमाल्यहविर्गन्धैर्हृद्यैश्चाप्यधिवासितां ॥ १५ ॥
हस्त्यश्वरथसंपूर्णां नानायानसमाकुलां ।
नानापार्थिववृन्दैश्च वणिग्भिश्चोपशोभितां ॥ १६ ॥
उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलां ।
सर्वयन्त्रायुधवतीमुपेतां सर्वशिल्पिभिः ॥ १७ ॥

सूतमागधसंबाधां श्रीमतीमतुलप्रभां ।
वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीं ॥ १८ ॥
मृदङ्गवेणुवीणानां रम्यैः शब्दैर्निनादितां ।
ब्रह्मघोषस्वनवतीं धनुःस्वननिनादितां ॥ १९ ॥
लोकपालोपमैः शूरैः सर्वशास्त्रार्थपारगैः ।
गुप्तां योधशतैश्चापि नागैर्भोगवतीमिव ॥ २० ॥

वराग्निमद्भिर्गुणिभिः स्वलंकृतां
द्विजोत्तमैर्वेदविदां पुरोगमैः ।
सहस्रदैः सत्यतपोदयान्वितैर्-
महर्षिकल्पैर्यतिभिर्यतात्मभिः ॥ २१ ॥

इति बालकाण्डे अयोध्यावर्णना नाम पञ्चमः सर्गः
॥ ५ ॥

## CAPUT VI.

### REGIS PRAECONIUM.

पुर्यां तस्यामयोध्यायां वेदवित् सर्वसंग्रहः ।
